M.G.UNIVERSITY
MODEL QUESTION PAPER
RESTRUCTURED SYLLABUS
PGCSS
M.A. Sanskrit Special Vyakarana
SEMESTER III

**COURS XII CORE XII THE VAKYAPADEEYA BHRAHMAKANDA**

संस्कृतभाषायमुत्तराणि देयानि। देवनागरीलिपिरुपयोक्तव्या

Time: 3hrs. Weightage: 30

PART A

1-8 पञ्च एकपुटमनतिक्रम्य उपन्यस्यत-

कारिकाः व्याख्यात-

1. एकमेव यदाम्नातं भिन्नं शक्तिव्यपाश्रयात्।
अपृथक्त्वेऽपि शक्तिभ्यः पृथक्त्वेनेव वर्तते।।

2. भेदानां बहुमार्गत्वं कर्मण्येकत्र चाङ्गता
शब्दानां यतशक्तित्वं तस्य शाखासु दृश्यते।।

3. चैतन्यमिव यश्चायं अविच्छेदेन वर्तते
आगमस्तमुपासीनो हेतुवादैर्न बाध्यते।।

4. अरणिस्थं यथा ज्योतिः प्रकाशान्तरकारणम्
तद्वच्छब्दोऽपि बुद्धिस्थः श्रुतीनां कारणं पृथक्।।

5. यथानुपूर्वी नियमो विकार क्षीरबीजयोः
तथैव प्रतिपत्तॄणां नियतो बुद्धिषु क्रमः।

6. विरुद्धपरिमाणेषु वज्रादर्शजलादिषु।
पर्वतादिसरूपाणां भावानां नास्ति संभवः।।

7. इति कर्तव्यता लोके सर्वशब्दव्यपाश्रया
यां पूर्वाहितसंस्कारो बालोऽपि प्रतिपद्यते।।

8. तद्विभागाविभागाभ्यां क्रियमाणमवस्थितम्
स्वभावज्ञैश्च भावानां दृश्यन्ते शव्दशक्तयः।।

5x1=5

## PART-B

9-16 पञ्च पुटद्वयमनतिक्रम्य उपन्यस्यत-

9. शव्दब्रह्मप्राप्तेरुपायं विशदयत ।

10. शब्दार्थसम्बन्धं विशदयत।

11. शब्देषु अनेकधर्मारोपः कथमिति प्रतिपादयत ।

12. शब्दानां भेदान् विशदयत।

13. वर्णपदवाक्यानामेकत्वं वाक्यपदीयदिशा विशदयत।

14. प्राकृतवैकृतध्वन्योः स्वरूपं विशदयत

15. साधुशब्दस्य पुण्यजनकत्वं प्रतिपादयत

16. शब्दविषये शिक्षाकारजैमिनिभाष्यकारादीनां मतमुपस्थापयत।

5x2=10

## PART-C

17-22 त्रीन् उपन्यस्यत

17. वाक्यपदीयदिशा व्याकरणस्य प्रयोजनं निरूपयत ।

18. अपभ्रंशविषये वाक्यपदीयकारमतं स्थापयत।

19. स्फोटध्वन्योः स्वरूपं विशदयत ।

20. शब्दब्रह्मणः स्वरूपं विवृणुत।

21. वाक्यपदीये स्वीकृतानि प्रमाणानि विचारयत।

22. जातिव्यक्तेः भेदकल्पनं निरूपयत। 3x5=15